# संस्कृतवार्ता:

दिनाङ्क :- 30.01.2026

प्रात: - 06:55

## आर्थिक सर्वेक्षणम्

देशस्य 'जीडीपी' अर्थात् सकलगृहोत्पादने सप्त-दशमलव-चतु: प्रतिशन्मितं वृद्धि: अनुमीयते। षट्विंशत्युत्तर-द्विसहस्रतमीये वित्तीय-वर्षे वृद्धि: षट्-दशमलव-अष्टप्रतिशन्मितात् सप्त-दशमलव-द्विप्रतिशन्मितम् इति सम्भावना, अथ अग्रिमे वित्तीय-वर्षे अपि स्थिति: समा एव, इति आशा प्रकटिता। एतत् अनुमानं केन्द्रीय-वित्तमन्त्रिपदासीनया निर्मला-सीतारमण-वर्यया संसदि प्रस्तुते आर्थिक-सर्वेक्षणे प्रकटितम्। आर्थिक-सर्वेक्षणानुसारेण भारतीय-अर्थव्यवस्था सुदृढां विकासगतिं प्राप्तवती। निजोपभोगेन अर्थ-निर्माणेन च विकासस्य गति: सततं समर्थिता, परन्तु आपूर्ति-पक्षे सेवानां योगदानं प्रमुखत्वेन स्थानं भजते।

## प्रधानमन्त्ी आर्थिक सर्वेक्षणम्

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् आर्थिक-सर्वेक्षण-द्वारा ज्ञायते यत् वैश्विक-समाह्वान-अनन्तरमपि भारतस्य अर्थव्यवस्था 'सुधार एक्सप्रेस' इति तीव्रगतियानरूपेण सततं विकासपथि अग्रेसरति। संचार-तन्त्र-पटले श्रीमोदी प्रकाशितवान् यत् गतदिने संसदि प्रस्तुतं आर्थिक-सर्वेक्षणं सुदृढ-व्यापक-आर्थिक-आधारभूत-सिद्धान्तरूपेण सततं राष्ट्रनिर्माणे नवाचार-उद्यमशीलता-अवसंरचना-मूल्यानां भूमिकां स्पष्टरूपेण प्रकाशयति।

## शिवराजसिंहचौहान:/आर्थिक सर्वेक्षणम्

कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह चौहान: ख्यापितवान् यत् आर्थिक-सर्वेक्षणेन स्पष्टं भवति यत् देशस्य विकास-गति:-समावेशि-सतत-रुपेण च वरीवृद्धा। वार्ताहरान् सम्बोधयन् श्री चौहान: प्रोक्तवान् यत् एतत सर्वेक्षणं केवलं संख्यानया-संकलनंय न, अपितु प्रधानमन्त्रिण: मोदिन: आत्मनिर्भर-भारत-संकल्पनानुसारेण शासनस्य प्रयासानां प्रतिबद्धतायाश्च अपि प्रतिबिम्बरूपं धारयति।

सर्वोच्चन्यायालयः-यूजीसी

सर्वोच्चन्यायालयेन गतदिने (उच्च-शिक्षण-संस्थानां समता-संवर्धनम्) विनियमः इत्येषः स्थगितः। न्यायालयेन विनियमानां विषये काश्चित् आपत्तयः प्रकटिताः, याः सामान्यवर्गस्य प्रति भेदभावयुक्ताः भवितुं शक्नुवन्ति। न्यायालयेन सूचितं यत् प्रख्यात-न्यायविदानां समित्या विनियमानां पुनरवलोकनं कर्तव्यम्।

बीटिङ्ग् रिट्रीट्ः

सप्तसप्तति-तमस्य गणतन्त्र-समारोहस्य समापनं निदर्शयन् बीटिङ्ग्-रिट्रीट्-समारोहः गतदिने नवदिल्ल्याः विजयचौक इत्यत्र सम्पन्नोऽभवत्। अस्मिन् अवसरे राष्ट्रपतिः द्रौपदीमुर्मू, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, रक्षामंत्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः च उपस्थिताः आसन्।

डब्ल्यू.पी.एल. - क्रिकेट्

महिलानां डब्ल्यू-पी-एल-क्रिकेट-लीग्-प्रतिस्पर्धायां गतरात्रौ क्रीडिते द्वन्द्वे रॉयल-चैलेंजर्स-बैंग्लोर-इति दलेन 'यूपी वॉरियर्स' इति दलं अष्टस्तोभ-पुरस्सरं पराजितम्। प्रथमं दण्डेन क्रीडयता 'यूपी वॉरियर्स' इति दलेन त्रिचत्वारिंशदुत्तर-शतं धावनांका: समर्जिता:, प्रत्युत्तरे 'रॉयल-चैलन्जर्स-बैंग्लोर- इति दलेन द्वि क्रीडकहानि- पुरस्सरं सहजतया लक्ष्यं समधिगतम्।

प्रतिस्पर्धायामद्य 'गुजरातटाइटंस-मुम्बई इण्डियन्स' इति दलयो: मध्ये द्वन्द्वं स्यात्।